## शास्त्री
## साहित्यदर्पणम् ।

05-12-2020

प्रश्नः → शरदिन्दुसुन्दर० इति साहित्यदर्पणस्यादिममङ्गलपद्यं व्याख्यायताम् ।

उत्तरम् → आचार्य-विश्वनाथकविराजविरचितस्य साहित्यदर्पणस्य आदिमो (प्रथमः) श्लोकः अस्ति →

"शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी ।
अपहृत्य तमः सन्ततमर्थानखिलान्प्रकाशयतु ॥

अस्य पदस्य माध्यमेन कविः मङ्गलमातनोति । मङ्गलाचरणानि त्रिविधानि भवन्ति → वस्तुनिर्देशात्मकम्, आशीर्वादात्मकं तथा च नमस्कारात्मकम् । अयं श्लोकः वस्तुनिर्देशात्मकं मङ्गलवाक्यानि । समाप्तिकामो मङ्गलम् आचरति इति सरणिम् अनुसरन् ग्रन्थकारः विश्वनाथः स्वग्रन्थस्य साहित्यदर्पणस्य निर्विघ्नपरिसमाप्तये स्वेष्टदेवतां वाग्देवीं स्तौति ।

शरदिन्दुसुन्दररुचिश्चेतसि → शरत्कालीन इन्दुः तद्वती सुन्दरी तया रुचिः कान्तिः चेतसि - हृदये, मे - मम, सा - तत् (स्त्री०, प्रथमा, एकवचने), देवी - सरस्वती, वाग्देवी, गिरां - वाणीम्, तमः - अन्धकारं अज्ञानं वा, सन्ततम् - निरन्तरम् (पुं०, सम् + तन् + क्त), अर्थान् (ऋ + थन्) आशयान्, प्रयोजनानि शब्दार्थान् वा, अपहृत्य → (अप + √हृ + ल्यप्) दूरीकृत्वा, अखिलान् (नास्ति खिलम् अवशिष्टम् यस्य, नञ् बहुव्रीहिश्च) सम्पूर्णान् प्रकाशयतु - प्रकटयतु । अत्र, अस्मिन् श्लोके उपमालङ्कारः । तल्लक्षणं - "साधर्म्यमुपमा भेदे ।" लुप्तोपमा - उपमावाचीशब्दः नैवास्ति ।

05-12-2020

डॉ० निर्मल कुमार झा, स० प्रा०
रा० उ० सं० महावि० सुखसेना ।

REDMI NOTE 9 PRO
AI QUAD CAMERA

05-12-2020

संस्कृतसामान्यम् । उपशास्त्री - II

अनिवार्यपत्रम् । पत्रलेखनम् ।

पत्रलेखनस्य ज्ञानं विशेषतया छात्राणां कृते परमावश्यकं भवति । अस्माभिः प्रतिदिनं पगे-पगे अस्यावश्यकता अनुभूयते । पत्रमाध्यमेन वयम् अस्माकं विचारान्, चिन्तनानि च **प्रकटयामः** ( प्रकटी **कुर्मः** ) ।

विविधविषयकानि पत्राणि भवन्ति — कार्यालयीयम्, व्यावसायिकम्, व्यक्तिगतञ्च । कार्यालयीयपत्रे कार्यालयीयसम्बन्धिनी वार्ता भवति । यथा- अधीनस्थाः कर्मचारिगणाः स्वविषये अधिकारिणं प्रति, प्रदत्तं कार्यं प्रति प्रगतिपत्रं च लिखन्ति ।

व्यावसायिकपत्रे व्यवसायसम्बन्धिग्रहणं दानञ्च, स्वीकरणम् अस्वीकरणञ्च वर्णितं भवन्ति ।

व्यक्तिगञ्चपत्रे अस्माभिः स्वपितरं मातरं भ्रातरं, मित्रं, स्वभार्यां, पतिञ्च अनेकानि पत्राणि विविधविषयोपरि प्रतिदिनं लिख्यते ।

अतएव पत्रलेखनस्याभ्यासं प्रतिदिनं कर्तव्यः । सम्बन्धीनां पत्रं प्राप्य वयं सुखानुभवं कुर्मः । सम्प्रति चलन्तदूरभासेन पत्रस्य महत्त्वं न्यूनतमं [illegible] **कृतम्** । तथापि सर्वकारस्य प्रायशः सर्वाणि कार्याणि पत्रमाध्यमेन भवन्ति अतएव पत्रलेखनाभ्यासः नित्यं कर्तव्यः ।

05-12-2020

डॉ० निर्मल कुमार झा, ( स० प्राचार्यः )
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

REDMI NOTE 9 PRO
AI QUAD CAMERA

संस्कृतसामान्यम्। उपशास्त्री I 05-12-2020

अनिवार्यपत्रम् । संस्कृतानुवादः अव्ययाधारितवाक्यानि ।

1. तुम कब घर से आओगे ? → त्वं कदा गृहादागमिष्यसि ?
2. हमलोग निश्चय ही कल विद्यालय पढ़ने जाएँगे →
वयं नूनं श्वः विद्यालयं पठितुम् (पठनाय) गमिष्यामः ।
3. इस समय वर्षा हो रही है → इदानीं वृष्टिः भवति (भवनस्ति) ।
4. मेरा छोटा भाई देर तक सोता है → ममानुजः (कनिष्ठः) चिरं शेते ।
5. तुम वहाँ जाओगे किन्तु मैं नहीं → त्वं तत्र यास्यसि परमहं (किन्तु, परन्तु) (अहं) न गमिष्यामि ।
6. भाग्यवश तुम सफल हुए → दिष्टया त्वं सफलः जातः ।
7. ठीक है, मैं उसे कह दूँगा → बाढम् अहं तं कथयिष्यामि ।
8. वे लोग व्यर्थ बोलते हैं → ते वृथा ब्रुवन्ति (आहुः, कथयन्ति, वदन्ति, भाषन्ते) ।
9. जैन लोग रात में नहीं खाते हैं → जैनाः नक्तं न हि खादन्ते ।
10. हमलोगों ने दिन में पढ़ा → वयं दिवा (दिने) अपठाम ।
11. आज-कल सब कुछ महँगा हो गया है → सम्प्रति अधुना वा महार्घं जातम् ।
11. यकायक कुछ नहीं करना चाहिए → सहसा किम् अपि न कुर्यात् ।
12. वह हमेशा झूठ बोलता है → सः सर्वदा मिथ्या वदति ।
13. कभी भी झूठ मत बोलो → कदा अपि मिथ्या मा (न) वद ।
14. दिन में नहीं सोना चाहिए → दिवा न (मा) स्वपेत् ।
15. तब यहाँ आकर सभी अपनी-अपनी बात कहने लगे →
ततः अत्र आगत्य सर्वे स्व-स्व वार्ताम् अकथयन् ।

05-12-2020

डॉ॰ निर्मल कुमार झा, (सं॰ प्राचार्यः) ।
राधा-उमाकान्त संस्कृत महावि॰ सुखसेना, पूर्णियाँ ।

REDMI NOTE 9 PRO
AI QUAD CAMERA